# Shri Ganesha Stuti Vasishthakrita

# વસિષ્ઠકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Vasishthakrita

File name : gaNeshastutiHvasiShThakRRitA.itx

Category : ganesha, mudgalapurANa, stuti, dvAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 30 | 2.30 2-16||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

Shri Ganesha Stuti Vasishthakrita

# વસિષ્ઠકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

વસિષ્ઠ ઉવાચ ।

અદ્યેયં ધરણી ધન્યા પિતરૌ તપ આશ્રમઃ ।

વિદ્યાવ્રતાદિ મે ધન્યં દર્શનાત્તે પદસ્ય ચ ॥ ૨॥

ત્વં કર્તા કારણં ચૈવ કારણાનાં ન સંશયઃ ।

ગમ્યાગમ્યમયઃ પ્રોક્તો વેદે વૈ વેદવાદિભિઃ ॥ ૩॥

સર્વરૂપશ્ચ સર્વૈસ્ત્વં હીનઃ સર્વપ્રકાશકઃ ।

યોગાભેદમયસ્ત્વં ત્વાં કથં સ્તૌમિ ગણાધિપ ॥ ૪॥

તથાઽપિ ભક્તિપાશેન યન્ત્રિતસ્ત્વં ગજાનન ।

અનુગ્રહાર્થમાયાતો નામરૂપધરઃ પ્રભો ॥ ૫॥

ત્વદ્દર્શનજબોધેન સ્તૌમિ ત્વાં બ્રહ્મનાયકમ્ ।

વેદાદિભિઃ સહાદ્યૈશ્ચ સંસ્તુતં યોગિભિઃ પરમ્ ॥ ૬॥

નમસ્તે ગણનાથાય નમસ્તે સર્વસાક્ષિણે ।

સર્વાકારાય વૈ તુભ્યં સ્વસંવેદ્યાય તે નમઃ ॥ ૭॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રદાય ચ ।

અમેયશક્તયે દેવ દેવ તુભ્યં નમો નમઃ ॥ ૮॥

અસમ્પ્રજ્ઞાતતુણ્ડાય સમ્પ્રજ્ઞાતશરીરિણે ।

તયોર્યોગે ચ યોગાત્મદેહાય તુ નમો નમઃ ॥ ૯॥

શાન્તિયોગપ્રકાશાય શાન્તિયોગમયાય તે ।

યોગિભ્યો યોગદાત્રે ચ યોગેશાય નમો નમઃ ॥ ૧૦॥

વક્રતુણ્ડાય વૈ તુભ્યમેકદન્તધરાય ચ ।

બ્રહ્માકારાત્મકાનાં તે ચિહ્નાનાં ધારિણે નમઃ ॥ ૧૧॥

સ્તુવતસ્તસ્ય હર્ષેણ કણ્ઠરોધઃ સમાભવત્ ।

નનર્ત હૃષ્ટરોમા વૈ દેહભાનવિવર્જિતઃ ॥ ૧૨॥

નિમગ્નં તં ભક્તિરસે વીક્ષ્ય દેવો ગજાનનઃ ।

તમુવાચ મહાભક્તં ભાવજ્ઞો ભાવપૂરકઃ ॥ ૧૩॥

(ફલશ્રુતિઃ)

ગણેશ ઉવાચ ।

ત્વયા કૃતમિદં વૈ યત્ સ્તોત્રં ભક્તિરસપ્રદમ્ ।

ધર્માર્થકામમોક્ષાણાં દાયકં પ્રભવિષ્યતિ ॥ ૧૪॥

મદીયા ભક્તિરચલા તવાનઘ ભવિષ્યતિ ।

સ્મૃતમાત્રશ્ચ તે ગેહં યાસ્યામિ મુનિસત્તમ ॥ ૧૫॥

એવમુક્ત્વા ગણાધીશોઽન્તર્દધે મમ પશ્યતઃ ।

સોઽહં તં હૃદયે પશ્યન્ સ્થિતઃ શાન્તિસમન્વિતઃ ॥ ૧૬॥

ઇતિ વસિષ્ઠકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

દ્વાદશસ્તોત્રં

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩૦ । ૨.૩૦ ૨-૧૬॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 30 . 2.30 2-16..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Vasishthakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*